रामनारायणदास का रजिस्टर्ड नंबर है।

42 ३ 5687 है।

जन्म का दिन - १२-२-२६ है।

प्र. निवासीजी ने लिखा है।

श्रीरामायनमः॥तपोभिःक्षीणपापानांशांतानांवीतरागीनां
मुमुक्षूणामपेक्षोयमात्मबोधोभिधीयते१बोधोन्यसाधने
भ्योहिसाक्षान्मोक्षैकसाधनं पाकस्यवन्हिवज्ज्ञानंविनामोक्षो
नसिध्यते२अविरोधितयाकर्मनाविद्यांविनिवर्तयेत् विद्या
विद्यांनिहंत्येवतेजस्तिमिरसंघवत्३अवछिन्नइवाज्ञानात्तन्ना
शेसतिकेवलःस्वयंप्रकाशतेह्यात्मामेघापायेंशुमानिव४
अज्ञानकलुषंजीवंज्ञानाभ्यासाद्विनेर्मलं कृत्वाज्ञानंस्वयंन
श्येज्जलंकतकरेणुवत्५संसारस्वप्नतुल्योहिरागद्वेषादिसं
कुलःस्वकालेसत्यवद्भाति प्रबोधेसत्यवद्भवेत्६तावत्सत्यंज
गद्भातिशुक्तिकारजतंयथा यावन्नज्ञायतेब्रह्मसर्वाधिष्ठानम
द्वयं७उपादानेखिलाधारेजगंतिपरमेश्वरे सर्गस्थितिल
यंयांतिबुद्बुदानीववारिणि८सच्चिदात्मन्यनुस्यूतेनित्येविष्णौ
प्रकल्पिताःव्यक्तयोविविधाःसर्वाःहाटकेकटकादिवत्९य
थाकाशोहृषीकेशोनानोपाधिगतोविभुःतद्भेदाद्भिन्नवद्भातित

१२१ ञ्चाकाशादेकवद्भवेत १० नानोपाधिवशादेव जातिवर्णाश्रमाद
105. यः आत्मन्यारोपितास्तोये रसवर्णादिभेदवत ११ पंचीकृतमहा
भूतसंभवं कर्मसंचितं शरीरं सुखदुःखानां भोगायतनमुच्य
ते १२ पंचप्राणमनोबुद्धि दशेंद्रियसमन्वितं अपंचीकृतभू
तोत्थं सूक्ष्मांगं भोगसाधनं १३ अनाद्यविद्यानिर्वाच्याकार
णोपाधिरुच्यते उपाधित्रितयादन्यमात्मानमवधारयेत १
४ पंचकोशादियोगेन तत्तन्मयइव स्थितः शुद्धात्मा नीलव
स्त्रादियोगेन स्फटिको यथा १५ वपुस्तुषादिभिः कोशैर्युक्तं यु
क्त्यवघाततः आत्मानमांतरं शुद्धं विविच्यात्तंडुलं यथा १६ सदा
सर्वगतोप्यात्मा न सर्वत्रावभासते बुद्धावेवावभासेत स्वच्छेषु
प्रतिबिंबवत १७ देहेंद्रियमनोबुद्धिप्रकृतिभ्यो विलक्षणं तद्वृ
त्तिसाक्षिणं विद्यादात्मानं राजवत्सदा १८ व्यापृतेष्विंद्रियेष्वात्मा
व्यापारीवाविवेकिनां दृश्यतेभ्रेषु धावत्सु धावन्निव यथा
शशी १९ आत्मचैतन्यमाश्रित्य देहेंद्रियमनोधियः स्वकीया

र्थेषुवर्त्तंति॥सूर्यालोकंजनायथा २० देहेंद्रियगुणान्कर्माण्यमले
सच्चिदात्मनि अध्यस्यंत्यविवेकेन गगनेनीलेमादिवत् २१
अज्ञानान्मानसोपाधेः कर्तृत्वादीनिचात्मनि कल्प्यंतेंबुगतेचं
द्रेचलनादियथांभसः २२ रागेछासुखदुःखादि बुद्धौसत्यांप्रव
र्त्तते सुषुप्तौनास्तितन्नाशे तस्माद्बुद्धेस्तुनात्मनः २३ प्रकाशोर्क
स्यतोयस्यशैत्यमग्नेर्यथोष्णता स्वभावःसच्चिदानंदनित्यनिर्म
लतात्मनः २४ आत्मनःसच्चिदंशश्च बुद्धेर्वृत्तिरितिद्वयं संयो तो
ज्यचाविवेकेनजानामीति प्रवर्त्तते २५ आत्मनोविक्रियानास्ति
बुद्धेर्बोधोनजात्विति जीवःसर्वमलंज्ञात्वा ज्ञाताद्रष्टेतिमुह्यति
२६ रज्जुसर्पवदात्मानंजीवंज्ञात्वाभयंवहेत् नाहंजीवःपरात्मेति हे
ज्ञाताचेन्निर्भयोभवेत् २७ आत्मावभासयत्येकोबुद्ध्यादीनीं
द्रियाण्यपि दीपोघटादिवत्स्वात्माजडैस्तैर्नावभास्यते २८ स्वबो
धेनान्यबोधेछा बोधरूपतयात्मनः नदीपस्यान्यदीपेछा यथा
स्वात्मप्रकाशने २९ निषिध्यनिखिलोपाधीन्नेतिनेतीतिवाक्यतः

१२२ विद्यादैक्यं महावाक्यैर्जीवात्मपरमात्मनो ३० आविद्यकं शरीरा
106. दि दृश्यं बुद्बुदवत्क्षरं एतद्विलक्षणं विद्यादहं ब्रह्मेति निर्मलं ३१
देहान्यत्वान्न मे जन्म जराकार्श्यलयादयः शब्दादिविषयैः संगो नि
रिन्द्रियतयान्न च ३२ अमनस्त्वान्न मे दुःखरागद्वेषभयादयः अप्रा
णो ह्यमनाः शुभ्र इत्यादि श्रुतिशासनात् ३३ निर्गुणो निष्क्रियो नि
त्यो निर्विकल्पो निरंजनः निर्विकारो निराकारो नित्यमुक्तोस्मि
निर्मलः ३४ अहमाकाशवत्सर्वं बहिरन्तर्गतोऽच्युतः सदा सर्व
समः शुद्धो निःसंगो निर्मलोऽचलः ३५ नित्यशुद्धविमुक्तैकम
खंडानंदमद्वयं सत्यं ज्ञानमनंतं यत्परं ब्रह्माहमेव तत् ३६ एवं नि
रंतरं कृत्वा ब्रह्मैवास्मीति भावना हरत्यविद्याविक्षेपान् रोगा
निव रसायनं ३७ विविक्तदेश आसीनो विरागो विजितेंद्रियः
भावयेदेकमात्मानं तमनंतमनन्यधीः ३८ आत्मन्येवाखिलं दृश्यं
प्रविलाप्य धिया सुधीः भावयेदेकमात्मानं निर्मलाकाशवत्सदा
३९ रूपवर्णादिकं सर्वं विहाय परमार्थवित् परिपूर्णचिदानं

ज्ञातृज्ञानज्ञेयभेदः परेनात्मनिविद्यते १

२ स्वरूपेणावतिष्ठते ५० चिदानंदैकरूपत्वाद्दीप्यते स्वयमे
वहि ५१ एवमात्मारणौ ध्यानमथने सततं कृते उदितावगति
ज्वाला सर्वाज्ञानेंधनं दहेत् ५२ अरुणेनैव बोधेन पूर्वंतु तमः
सिहृते ततआविर्भवेदात्मा स्वयमेवांशुमानिव ५३ आत्मा
तु सततं प्राप्तोप्यप्राप्तवदविद्यया तन्नाशे प्राप्तवद्भाति स्वकंठा
भरणं यथा ५४ स्थाणौ पुरुषवद्भ्रान्त्या कृता ब्रह्मणि जीवता
जीवस्य तात्त्विके रूपे तस्मिन्दृष्टे निवर्तते ५५ तत्त्वस्वरूपानु
भवादुत्पन्नं ज्ञानमंजसा अहं ममेति चाज्ञानं बाधते दिग्भ्रमं
यथा ५६ सम्यग्विज्ञानवान्योगी स्वात्मन्येवाखिलं स्थितं एकं
च सर्वमात्मानमीक्षते ज्ञानचक्षुषा ५७ आत्मैवेदं जगत्सर्व
मात्मनोन्यन्नविद्यते मृदो यद्वद्घटादीनि स्वात्मानं सर्वमीक्ष
ते ५८ जीवन्मुक्तस्तु तज्ज्ञानात्पूर्वोपाधिगुणांस्त्यजेत् सच्चि
दानंदरूपत्वाद्भवेद्भ्रमरकीटवत् ५९ तीर्त्वा मोहार्णवं हत्वा रागा
द्वेषादिराक्षसान् योगी शांतिसमायुक्त आत्मारामो विराजते

१२३ यद्दृष्ट्वा नापरं दृश्यं यद्भूत्वा न पुनर्भवः यज्ज्ञात्वा नापरं ज्ञेयं तद्ब्रह्मे
त्यवधारयेत् ५५
५० बाह्यानित्यसुखासक्तिं हित्वात्मसुखनिर्वृतः घटस्थदी
107 व पवच्छुद्धः स्वान्तरेव प्रकाशते ५१ उपाधिस्थोऽपि तद्धर्मैरलिप्तो
व्योमवन्मुनिः सर्वविन्मूढवत्तिष्ठेदसक्तो वायुवच्चरेत् ५२
उपाधिविलयाद्विष्णौ निर्विशेषं विशेन्मुनिः जले जलं वि
यद्व्योम्नि तेजस्तेजसि वा यथा ५३ यल्लाभान्नापरो लाभो यत्सु
खान्नापरं सुखं यज्ज्ञानान्नापरं ज्ञानं तद्ब्रह्मेत्यवधारयेत्
५४ तिर्यगूर्ध्वमधः पूर्णं सच्चिदानन्दमद्वयं अनन्तं नित्यमेकं
यत्तद्ब्रह्मेत्यवधारयेत् ५५ अतद्व्यावृत्तिरूपेण वेदान्तैर्लक्ष्यते
द्वयं अखण्डानन्दमेकं यत्तद्ब्रह्मेत्यवधारयेत् ५६ अखण्डानन्द
रूपस्य तस्यानन्दलवाश्रिताः ब्रह्माद्यास्तारतम्येन भवंत्या
नंदिनोऽखिलाः ५७ तद्युक्तमखिलं ज्ञाने व्यवहारस्तदन्वितः तस्मा
त्सर्वगतं ब्रह्म क्षीरे सर्पिरिवाखिले ५८ अनण्वस्थूलमह्रस्वम
दीर्घमजमव्ययं अरूपगुणवर्णाख्यं तद्ब्रह्म० ५९ यद्भासा भा
स्यतेऽर्कादि भास्यैर्यत्तु न भास्यते येन सर्वमिदं भाति तद्ब्रह्म०

तं
६० स्वयमंतर्बहिर्व्याप्य भासयन्नखिलं जगत् ब्रह्म प्रकाशते वह्नि:
प्रतप्तायसपिंडवत् ६१ जगद्विलक्षणं ब्रह्म ब्रह्मणोन्यन्न किंचि
न ब्रह्मान्यद्भाति चेन्मिथ्या यथा मरुमरीचिका ६२ दृश्यते श्रू
यते यद्यद्ब्रह्मणोन्यन्न किंचन तत्त्वज्ञानाच्च तद्ब्रह्म सच्चिदानंद गं
गं मद्वयं ६३ सर्वगं सच्चिदात्मानं ज्ञानचक्षुर्निरीक्षते अज्ञानच
क्षुर्नेक्षेत भास्वंतं भानुमंधवत् ६४ श्रवणादिभिरुद्दीप्तज्ञा
नाग्निपरितापित: जीव: सर्वमलान्मुक्त: स्वर्णवद्द्योतते स्व त्
यं ६५ हृदाकाशोदितो ह्यात्मा बोधभानुस्तमोपहृत् सर्वव्या
पी सर्वधारी भाति भासयतेखिलं ६६ दिग्देशकालाद्यनपे
क्ष्य सर्वगं शीतादिहृन्नित्यसुखं निरंजनं यः स्वात्मतीर्थं भज
ते विनिष्क्रियः स सर्ववित्सर्वगतोमृतो भवेत् ६७ इति श्री
आत्मबोधः समाप्तः श्री रामजी १८९१ मङ्गोरपौ

१२८

108. श्रीरामायनमः श्रीमहादेवउवाच अथतेकथयिष्या
मि रहस्यमतिदुर्लभं सीताराममरुत्सूनोः संवादंमोक्ष
साधनं १ पुरारामायणेरामो रावणंदेवकंटकं हत्वा
रणेरणश्लाघ्यं सपुत्रबलवाहनं २ सीतयासहसुग्री
व लक्ष्मणाभ्यांसमन्वितः अयोध्यामगमद्रामो हनुम
त्प्रमुखैर्वृतः ३ अभिषिक्तःपरिवृतो वसिष्ठाद्यैर्महात्म
भिः सिंहासनेसमासीनः कोटिसूर्यसमप्रभः ४ दृष्ट्वा
तदाहनूमंतं प्रांजलिंपुरतःस्थितं कृतकार्यंनिराकां
क्षं ज्ञानापेक्षंमहामतिं ५ रामःसीतामुवाचेदं ब्रूहितत्त्वं
हनूमते निःकल्मषोयंज्ञानस्य पात्रंनौनित्यभक्तिमा
न् ६ तथेतिजानकीप्राह तत्त्वंरामस्यनिश्चितं हनू

मत्तेप्रपन्नाय सीतालोकरवेमोरहिनी ७ सीतोवाच रामं
खिहिपरंब्रम्ह सच्चेरानंदमहयं सर्वोपाधिरवेनेर्मकं
सत्तामात्रमगोचरं ८ आनंदंनेर्मलं शांतंनिर्विकारं
नेरंजनं सर्वव्यापिनमात्मानं स्वप्रकाशमकल्मषं
९ मारवेहिमूलप्रकृतिं सर्गस्थित्यंतकारिणी तस्य
सन्नेध्यमात्रेण सृजामीदमतंद्रेता १० तत्सानिध्या
न्मयासृष्टं तस्मिन्नारोप्यतेबुधैः अयोध्यानगरेजं
न्म रघुवंशेतिनेर्मलं ११ विश्वामित्रसहायत्वं
मरवसंरक्षणंततः अहिल्याशापशमनं चाप
भंगोमहेश्वरेतुः १२ मत्पाणिग्रहणंपश्चात् भार्गवि
स्यमदक्षयः अयोध्यानगरेवासो मयाद्वादशवा
र्षिकिः १३ दंडकारण्यगमनंविराधवधएवच मा

१२५
109.

यामारीचमरणं मायासीताहरनेस्तथा १५ जटायुषो
मोह्लाभः कबंधस्यतथैवच शबरीपूजनंपश्चा
त् सुग्रीवेणसमागमः बालिनश्चवधःपश्चात् सी
तान्वेषणमेवच सेतुबंधश्चनलधौ लंकायाश्चनि
रोधनं १६ रावणस्यवधोयुधे सपुत्रस्यदुरात्मनः
रबिभीषणोराज्यदानं पुष्पकेणमयासह १७
अयोध्यागमनंपश्चा उाजेरामाभिषेचनं एवमा
दीनिकर्माणि मयैवचरितानिच १८ आरोप
यंतिरामेस्मि रत्नेरवेकारखिलात्मने रामोन
गच्छतिनरत्ते इतिनानुशोचन नाकांक्षतेत्यजातेनो
कुम्कत्तेनरकिंचित् आनंदमूर्त्तिरचलःपरिणामही

नो मायागुणाननुगतोहतथारवेभारते १९ श्रीमहा
देवउवाच ततोरामःस्वयंप्राह हनूमंतमुपस्थितं
श्रृणुतत्वंप्रवक्ष्यामि ह्यात्मानात्मपरात्मनां २० आका
शस्ययथाभेद स्त्रिविधोदृश्यतेमहान् जलाशये
महाकाशस्तदवछिन्नएवहि २१ प्रतिबिंबाख्यमप
रं दृश्यतेत्रिविधंनभः बुद्ध्यवछिन्नचैतन्यमेकंपूर्ण
मथापरं २२ आभासस्त्वपरोबिंबभूतमेवंत्रिधा
चितेः साभासबुद्धेःकर्तृत्वमवछिन्नेविकारिणि
साक्षिण्यारोप्यतेभ्रांत्याजीवत्वंचतथाबुधैः
२३ आभासस्तुमृषाबुद्धिरविद्याकार्यमुच्यते २४ अ
विछिन्नंतुतद्ब्रह्म विछेदस्तुविकल्पितः अवछिन्नस्य
पूर्णेनएकत्वंप्रतिपाद्यते २५ तत्वमस्यादिवाक्यै

अवछिन्न
अविकारी
साक्षी विषे
आरोपण क
रते हैं भ्रांत
करके नैसे
जीवत्व कूं
अबुधी

पक्ष साभासस्याहमस्तथा एकाज्ञानयदोत्पन्नं मह
वाक्येन चात्मनोः २६ तदा रवेद्यास्वकार्यैश्च न भूयते
वनसंभूयः एतद्विज्ञाय मद्भक्तो मद्भावायोपपद्यते
२७ मद्भक्तैरवैमुखानां हि भूलक्ष्ममात्रेषु सह्यतां न
मोनं न च मोहः स्यान्नैषां जन्मभूतैररवे २८ इदं र
स्यं हृदयं ममात्मनो मयैव साक्षात्कथितं तवानघ
॥ मद्भक्तिहीनाय कदापि न त्वया दातव्यमैंद्रादपि
राज्यतोधिकं २९ श्रीमहादेव उवाच एतत्ते रमे रहितं दे
वि श्रीरामहृदयं मया अतिगुह्यतमं हृद्यं पवित्रं पाप
नाशनं ३० साक्षाद्रामेण कथितं सर्ववेदांतसंग्रहं
यः पठेत्सततं भक्त्या स मुक्तो नात्र संशयः ३१ ब्रह्मह
त्यादिपापानि बहुजन्मार्जितान्यपि नश्यंते च न संदे

हो रामस्यवचनं यथा ३२ जानते ओघोरतेपापी परधन
परदारेषुरतेचोरितोवा स्तेयीब्रह्मघ्नमातापितृवधाते
रतः स्वामिरतेरापकारी यः संपूज्यार श्रीरामंपठतेच
हृदयंरामचंद्रस्य भक्त्या योगींद्रैरप्यलभ्यंपदमवेत
भवतेसर्वदेवैः संपूज्यः ३३ इतिश्रीरामहृदयंसमाप्तं॥
श्रीरामायनमः अथसिद्धगीता सिद्धाऊचुः उ१९६ अयसमायोगा
त्स्पानंरजिघ्नोयः यस्तत्स्वात्मतत्त्वोऽयंरत्नेस्यंदंसमुपास्महे १ ॥१८
त्रीन्द्रियारिन्त्यक्त्वा वासनयासहा इन्द्रनिप्रथमाभासमात्मानंस
मुपास्महे २ द्वयोर्मध्यगतंनित्यमस्तिनास्तीतिपक्षयोः प्रकाशकंप्रकाशं स
म्यानामात्मानंसमुपास्महे ३ यस्मिन्सर्वंयस्यसर्वं यतःसर्वंयस्मा
दिदं येनसर्वंयदिदंसर्वंतत्सत्यंसमुपास्महे ४ अकारस्केहकारांतमत्रो
पाकारसेस्थितं आजस्त्रमुच्चरंतंस्वंतमात्मानमुपास्महे ५ संत्यज्यह
्हेस्थानंदेवमन्यंप्रयांतिये तेरत्नमपमिवाहुरित्यक्त्वाहस्तस्थकौस्तु

भाः६ सर्वोज्ञाः स्वेकेलसंत्याज्यफलमेत्र७ वाप्यते येनात्र्यादिषवली
।।।. त्वं नोमूलमूलाचिली यते ७ बुध्वाप्यैतिवेरस्य यपदार्थेषु कुर्मतिः ब
ध्नातिभावनाभूयो नरान सोगाधमः ८ उरस्थितानुरस्थितो नेतानिंऽया
रान्पुनःपुनः हन्यारुद्धिचेकरंडेन वज्रेणोवहरिणरिलू ९ उपक्राम
सुखमाहरेत्पवित्रं समवस्तः सममरत्ते साधुचेतः प्रवृत्तिमेतम
नसः स्वकेस्वरूपे भवरतेसुखेस्थितः कृतमाचिराय १० इतिश्री
श्रीभगवानुवाच ज्ञानंपरमगुह्यंमेयद्विज्ञानसमन्वितं सरहस्यं
तदंगंच गृहाणगदितंमया १ यावानहं यथा भावो यद्रूपगुणकर्म
कः तथैवतत्त्वविज्ञानमस्तुतेमदनुग्रहात् २ अहमेवासमेवाग्रे
नान्यद्यत्सदसत्परं पश्चादहं यदेतच्च योवशिष्येतसोस्म्यहं ३ ऋते
र्थंयत्प्रतीयेत नप्रतीयेतचात्मनि तद्विद्यादात्मनोमायां यथाभासोय
थातमः ४ यथामहांतिभूतानि भूतेषूच्चावचेष्वनु प्रविष्टान्यप्रविष्टा
नि तथातेषुनतेष्वहं ५ एतावदेवजिज्ञास्यंतत्त्वजिज्ञासुनात्मनः अन्व
यव्यतिरेकाभ्यां यत्स्यात्सर्वत्रसर्वदा ६ एतन्मतंसमातिष्ठ परमेणसम।

धेना । मदान्क लाविकल्पेषु नरो मुह्यति करहिं चित् ७ श्री शुकोवाच
से पुरं देवैव मजनो जनानां परमे स्थिनं पश्यतस्तस्य तद्रूप मात्म
नो प्रकृता कृतिः ८ एतत्स्तोत्रं पठेन्नित्यं श्लोकं भागवतोक्तं चेत् ।
अष्टादश पुराणानां पठनात्लभते फलं ९ इति श्री चतुः श्लोकी ॥
यज्ञेन परिसंस्थाने च स्थितिः सद्भिरिति चोच्यते कर्म चैव तदर्थीयं सदित्ये
वाभिधीयते २७ अर्थः यज्ञादिषु च या स्थितिः । तात्पर्येण वस्थानं
तदपि सदित्युच्यते । यस्य चेदं नाम त्रयं सर्वं च परमा र्थः फलं य
स्य तत्तदर्थं कर्म पूजोपहार गृहारामपरिमार्जनोपलेपरङ्गमाल
कादिरूपं क्रियते तत्सिद्ध्ये यदन्यत्कर्म क्रियते उद्यान शालेहत्र धनार्ज
नादिविषयं तत्कर्म तदर्थीयं । तच्चापि व्यवहितमपि सदित्येवाभिधी
यते । यस्मादेवमतिप्रशस्तमेतन्नाम त्रयं तस्मादेतत्सर्वकर्मसा
गुण्यार्थं कीर्तयेदिति तात्पर्यार्थः । अत्र चार्थवादानुपपत्त्या विधिः
कल्प्यते विधेयं स्तूयते वस्त्विति न्यायात् अपरे तु प्रवृत्तिर्विधानात्
क्रियते मोह कोटिभिः स्तुत्यादिवर्त्मानो परेऽत्राः समेधो यजतीत्यादिव
द्विधितयापरिमेनाय स्त्यादुः । ननु सद्भावे साधु भावे चेत्यादिषु प्राप्त्या

त्याज्यं दोषवदित्येके कर्म प्राहुर्मनीषिणः । यज्ञदानतपःकर्म न त्या-
ज्यमिति चापरे ३ दोषवत् हिंसादिदोषवत्त्वेन बंधकरमिति हेतोः सर्व-
मपि कर्म त्याज्यमित्येके सांख्याः प्राहुः कर्म प्राहुर्मनीषिण इत्यस्या-
यं भावः न हिंस्यात्सर्वभूतानि इत्ते निषेधः । पुरुषस्यानर्थहेतुर्हिं-
सेत्याह अग्नीषोमीयं पशुमालभेत इत्यादिः प्राकरणिको विधि-
स्तु हिंसायाः क्रतूपकारकत्वमाह । अतो भिन्नविषयत्वेन सामान्य-
विशेषन्यायागोचरत्वात् बाधबाधकता न संभवति अतोऽध्वा-
साधिपसर्वेष्वपि कर्मसु हिंसादेः संभवात् सर्वमपि त्याज्यमेवेति कर्मे
तेऽउक्तं दृष्टवदानुश्रविकः स ह्यविशुद्धिक्षयातिशययुक्त इति अपरे
तु मीमांसकाः यज्ञादिकं कर्म न त्याज्यमिति प्राहुः । अयं भावः क्र-
त्वर्थापि सती हिंसा पुरुषेणैव कर्तव्या । सा चान्योद्देशेनापि कृता पु-
प्रत्यवायहेतुरेवेति यावद्धि विधिर्विधेयस्य तदुद्देशेनानुष्ठानं विधत्ते
तोऽस्य फलहेतुत्वाच्च बधस्यानर्थत्वे निषेधस्य तात्पर्यमपहरतो प्रा-
प्तिमात्रापेक्षत्वात् अन्यथा अज्ञानप्रमादादिकृते दोषाभावप्रसंगात्
तदेवं समानविषयत्वेन समानन्यायस्य विरोधे न बधान्नातिदो-
षत्वा अतो नित्यं यज्ञादिकर्म न त्याज्यमित्यर्थः एवं मतभेदमुपन्य-
स्य स्वमतं कथयितुमाह ४

दोषत्वके क्या कर्म के देवता र्थतहराते

श्रीरामायनमः निधायहृदिविश्वेशं विधायगुरुवंदनं बा
लानांसुखबोधायक्रियतेतर्कसंग्रहः१ द्रव्यगुणकर्मसा
मान्यविशेषसमवायाभावाःसप्तपदार्थाः तत्रद्रव्याणि
पृथ्व्यप्तेजोवाय्वाकाशकालदिगात्ममनांसिनवैवरूप
रसगंधस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभाग
परत्वापरत्वगुरुत्वद्रवत्वस्नेहशब्दबुद्धिसुखदुःखेच्छाद्वेष
प्रयत्नधर्माधर्मसंस्काराश्चतुर्विंशतिर्गुणाः उत्क्षेपणापक्षे
पणाकुंचनप्रसारणगमनानिपंचैवकर्माणि परमपरंचे
तिद्विविधंसामान्यं नित्यद्रव्यवृत्तयोविशेषास्त्वनंताएव समवा
यस्त्वेकएव अभावश्चतुर्विधः प्रागभावःप्रध्वंसाभावोऽत्यंता
भावोन्योन्याभावश्चेति गंधवतीपृथ्वी साद्विधानित्यानित्या
च नित्यापरमाणुरूपा अनित्याकार्यरूपा पुनस्त्रिधा शरी
रेंद्रियविषयभेदात् शरीरमस्मदादीनां इंद्रियंगंधग्राहकंघ्रा

तेक्रियतेप्रतिपाद्यते पदार्थाः अनेन

संबंध

णंनासाग्रवर्त्ति विषयोमृत्पाषाणादिः शीतस्पर्शवत्यापःता
द्विधाःनित्याअनित्याश्च नित्यापरमाणुरूपा अनित्याकार्यरूपाः
पुनस्त्रिविधाः शरीरेंद्रियविषयभेदात् शरीरंवरुणलोके
इंद्रियंरसग्राहकंरसनंजिह्वाग्रवर्त्ति विषयःसरित्समुद्रादिः
उष्णस्पर्शवत्तेजः तच्चद्विविधंनित्यमनित्यंच नित्यंपरमाणुरू
पंअनित्यंकार्यरूपंपुनस्त्रिविधंशरीरेंद्रियविषयभेदात् श
रीरमादित्यलोके इंद्रियंरूपग्राहकंचक्षुः कृष्णताराग्रवर्त्ति
विषयश्चतुर्विधः भौमदिव्यौदर्याकरजभेदात् भौमंवह्न्यादि
कं अबिंधनंदिव्यंविद्युदादि भुक्तस्यपरिणामहेतुरौदर्यंआ
करजंसुवर्णादि रूपरहितःस्पर्शवान्वायुः सद्विधःनित्योनि
त्यश्च नित्यःपरमाणुरूपो अनित्यःकार्यरूपः पुनस्त्रिविधः
शरीरेंद्रियविषयभेदात् शरीरंवायुलोके इंद्रियंस्पर्शग्रा
हकंत्वक् सर्वशरीरवर्त्ति विषयोवृक्षादिकंपनहेतुः शरीरां

न्तःसंचारीवायुःप्राणःसचएकोप्युपाधिभेदात्प्राणापा
नादिसंज्ञांलभते शब्दगुणमाकाशं तच्चैकंविभुनित्यंच अ
तीतादिव्यवहारहेतुःकालःसचैकोविभुर्नित्यश्च प्राच्यादि
व्यवहारहेतुर्दिक् साचैकानित्याविभ्वीच ज्ञानाधिकरण
मात्मासद्विधःपरमात्माजीवश्च तत्रेश्वरःसर्वज्ञःपरमात्मा
एकएव जीवःप्रतिशरीरंभिन्नोविभुर्नित्यश्च सुखाद्युपल
ब्धिसाधनमिंद्रियंमनः तच्चप्रत्यात्मनियतत्वादनंतंपरमाणुरू
पंनित्यंच चक्षुर्मात्रग्राह्योगुणोरूपं तच्चशुक्लनीलपीतरक्त
हरितकपिशचित्रभेदात्सप्तविधं पृथिवीजलतेजोवृत्ति
तत्रपृथिव्यांसप्तविधं अ भास्वरंशुक्लंजले शुक्लंभास्वरं
तेजसि रसनाग्राह्योगुणोरसः सचमधुराम्ललवणकटु
तिक्तकषायभेदात्षड्विधः पृथिवीजलवृत्तिः पृथिव्यांष
ड्विधः जलेमधुरएव घ्राणग्राह्योगुणोगंधः सचद्विधः सु
रभिरसुरभिश्च पृथिवीमात्रवृत्तिः त्वगिंद्रियमात्रग्राह्यो

ता: स्पर्शः स च त्रिविधः शीतोष्णानुष्णाशीतभेदात् पृथ्वि
व्यप्तेजोवायुवृत्तिः तत्र शीतो जले उष्णस्तेजसि अनुष्णाशी
तः पृथ्वीवाय्वोः रूपादिचतुष्टयं पृथिव्यां पाकजमनित्यं
च अन्यत्रापाकजं नित्यमनित्यं च नित्यगतं नित्यं अनित्यग
तमनित्यं एकत्वादिव्यवहारहेतुः संख्या नवद्रव्यवृत्तिः
एकत्वादिपरार्धपर्यन्ता एकत्वं नित्यमनित्यं च नित्यगतं नि
त्यं अनित्यगतमनित्यं द्वित्वादिकं तु सर्वत्राप्यनित्यमेव मा
नव्यवहारासाधारणं कारणं परिमाणं नवद्रव्यवृत्ति त
च्चतुर्विधं अणुमहद्दीर्घह्रस्वं चेति पृथग्व्यवहारासाधा
रणं कारणं पृथक्त्वं सर्वद्रव्यवृत्ति संयुक्तव्यवहारहेतुः
संयोगः सर्वद्रव्यवृत्तिः संयोगनाशको गुणो विभागः स
र्वद्रव्यवृत्तिः परापरव्यवहारासाधारणे कारणे परत्वा
परत्वे पृथिव्यादिचतुष्टयमनोवृत्ती ते द्विविधे दिक्कृते का
लकृते चेति दूरस्थे दिक्कृतं परत्वं समीपस्थे दिक्कृतमप

…रत्वं ज्येष्ठे कालकृतं परत्वं कनिष्ठे कालकृतमपरत्वं आद्य
पतनासमवायिकारणं गुरुत्वं पृथिवीजलवृत्ति स्यंदना
समवायिकारणं द्रवत्वं पृथिव्यप्तेजोवृत्ति तद्द्विधं सांसिद्धि
कं नैमित्तिकं च सांसिद्धिकं जले नैमित्तिकं पृथिवीतेजसो
: पृथिव्यां घृतादावग्निसंयोगजं द्रवत्वं तेजसि सुवर्णा
दौ च चूर्णादिपिंडीभावव्यवहारहेतुर्गुणः स्नेहः जलमात्र
वृत्तिः श्रोत्रग्राह्यो गुणः शब्दः आकाशमात्रवृत्तिः स द्वि
धः ध्वन्यात्मको वर्णात्मकश्चेति ध्वन्यात्मको भेर्यादौ
वर्णात्मकः संस्कृतभाषारूपः सर्वव्यवहारहेतुर्गुणो
बुद्धिः सा द्विधा स्मृतिरनुभवश्च संस्कारमात्रजन्यं
ज्ञानं स्मृतिः तद्भिन्नं ज्ञानमनुभवः स द्विधः यथार्थो
ऽयथार्थश्च तद्वति तत्प्रकारकोनुभवो यथार्थः सैव प्र
मेत्युच्यते तदभाववति तत्प्रकारकोनुभवोऽयथार्थः य

ये

त्युपमि १

१३१ थार्थानुभवचतुर्विधः प्रत्यक्षानुमितिशाब्दभेदात् तत्का
115 रणमपि चतुर्विधं प्रत्यक्षानुमानोपमानशब्दभेदात् व्या
पारवत् असाधारणं कारणं करणं अनन्यथासिद्धि
॥ कार्यनियतपूर्ववृत्ति कारणं कार्यं प्रागभावप्रतियोगि
॥ कारणं त्रिविधं समवाय्यसमवायिनिमित्तभेदात्
यत्समवेतं कार्यमुत्पद्यते तत्समवायिकारणं यथा तं
तवः पटस्य पट स्वगतरूपादेः कार्येण कारणेन च
सहैकस्मिन्नर्थे समवेतत्वे सति यत्कारणं तदसमवायि
कारणं यथा तन्तुसंयोगः पटस्य तन्तुरूपं पटरूपस्य त
दुभयभिन्नं कारणं निमित्तकारणं यथा तुरीवेमादिकं
पटस्य एतत्त्रिविधकारणमध्ये यदसाधारणं कारणं
तदेव करणं तत्र प्रत्यक्षज्ञानकरणं प्रत्यक्षं इन्द्रियार्थ
सन्निकर्षजन्यं ज्ञानं प्रत्यक्षं तद्द्विविधं निर्विकल्पकं

सविकल्पकं च तत्र निष्प्रकारकं ज्ञानं निर्विकल्पकं यथा
किंचिदिदमिति सप्रकारकं सविकल्पकं यथा डित्थोयं ब्राह्मणोयं
श्यामोयं पाचकोयमिति प्रत्यक्षज्ञानहेतुरिंद्रियार्थसन्निकर्षः स च
षड्विधः संयोगः संयुक्तसमवायः संयुक्तसमवेतसम
वायः समवायः समवेतसमवायो विशेषणविशेष्यभा
वश्चेति चक्षुषा घटप्रत्यक्षजनने संयोगः सन्निकर्षः ॥
घटरूपप्रत्यक्षे संयुक्तसमवायः चक्षुसंयुक्ते घटे रूप
स्य समवायात् रूपत्वसामान्यप्रत्यक्षे संयुक्तसमवेत
समवायः चक्षुसंयुक्ते घटे रूपं समवेतं तत्र रूपत्वस्य स
मवायात् श्रोत्रेण शब्दसाक्षात्कारे समवायः सन्निक
र्षः कर्णविवरवर्त्याकाशस्य श्रोत्रत्वात् शब्दस्याकाश
गुणत्वात् गुणगुणिनोः समवायात् शब्दत्वसाक्षात्का
रे समवेतसमवायः सन्निकर्षः श्रोत्रसमवेतशब्दे श

116

इत्व समवायात् अभावप्रत्यक्षे विशेषणविशेष्यभावः
सन्निकर्षः घटाभाववद्भूतलमित्यत्र चक्षुःसंयुक्ते भूत
ले घटाभावस्य विशेषणत्वात् एवं सन्निकर्षषट्कजन्यं ज्ञा
नं साक्षात्कारः तत्करणमिंद्रियं तस्मादिंद्रियं प्रत्यक्ष
प्रमाणमिति सिद्धं अनुमितिकरणमनुमानं परा
मर्शजन्यं ज्ञानमनुमितिः व्याप्तिविशिष्टपक्षधर्मताज्ञा
नं परामर्शः यथा वह्निव्याप्यधूमवानयं पर्वत इति तत्
ज्जन्यं पर्वतो वह्निमानिति ज्ञानमनुमितिः यत्र धूमस्त
त्राग्निरिति साहचर्यनियमो व्याप्तिः व्याप्यस्य पर्वतादि
वृत्तित्वं पक्षधर्मता अनुमानं द्विविधं स्वार्थं परार्थं च
स्वार्थं स्वानुमितिहेतुः तथा हि स्वयमेव भूयो दर्शने
न यत्र धूमस्तत्राग्निरिति महानसादौ व्याप्तिं गृहीत्वा
वा पर्वतसमीपं गतस्तद्गते चाग्नौ संदिहानः पर्व

तेधूमंपश्यन्व्याप्तिंस्मरति यत्रधूमस्तत्राग्निरिति तदनं
तरं वह्निव्याप्यधूमवानयंपर्वतइतिज्ञानमुत्पद्यते
ऽयमेवलिंगपरामर्शइत्युच्यते तस्मात्पर्वतोवह्निमा
निति ज्ञानमनुमितिरुत्पद्यते तदेतत्स्वार्थानुमानं
।।यत्तुस्वयंधूमादग्निमनुमायपरप्रतीत्यर्थं पंचा
वयववाक्यंप्रयुज्यतेतत्परार्थानुमानम् यथापर्व
तोऽग्निमान् धूमवत्वात् योयोधूमवान्ससोऽग्निमान्य
था महानसस्तथाचायं तस्मात्तथेति अनेनप्रतिपा
दितात्लिंगात्परोप्यग्निंप्रतिपद्यते तदेवपरार्थानुमा
नम् प्रतिज्ञाहेतुउदाहरणोपनयनिगमनानिपंचाव
यवाः पर्वतोऽग्निमानितिप्रतिज्ञा धूमवत्वादितिहेतुः
योयोधूमवान्ससोऽग्निमान्यथामहानसइत्युदाह

१३३ तं तथा चायमित्युपनयः तस्मात्तथेति निगमनं स्वा
117 र्थानुमितिः परार्थानुमितिर्वा लिंगपरामर्श एव करणं
तस्माल्लिंगपरामर्शोनुमानं लिंगं त्रिविधं अन्व
यव्यतिरेकि केवलान्वयि केवलव्यतिरेकि चेति अ
न्वयेन व्यतिरेकेण च यस्य व्याप्तिर्गृहीता अन्वय
व्यतिरेकि यथा वह्नौ साध्ये धूमवत्वं यत्र धूमस्त
त्राग्निरित्यन्वयव्याप्तिः यत्र वह्निर्नास्ति तत्र धू
मो नास्ति यथा ह्रद इति व्यतिरेकव्याप्तिः अन्वय
मात्रव्याप्तिकं केवलान्वयि यथा घटोऽभिधेयः प्र
मेयत्वात्पटवदिति अत्र प्रमेयत्वाभिधेयत्वयो
र्व्यतिरेकव्याप्तिर्नास्ति सर्वस्य प्रमेयत्वाभिधे
यत्वाच्च व्यतिरेकमात्रव्याप्तिकं केवलव्यतिरेकि

स्वे यथा पर्वत इतरेभ्यो भिद्यते गंधवत्वात् यदितरेभ्यो न भिद्यते न तद् गंधवद्यथा जलं न चैयं तथा तस्मान्न तथेति व्य
तिरेकं धवत्र इतरभेत्रभेत्यन्वय उदाहरणतो नास्ति प
क्षवीमात्रस्य पक्षत्वात् संदिग्ध साध्यवान् पक्षः
यथा धूमवत्वहेतौ पर्वतः निश्चित साध्यवान् सपक्षः
यथा तत्रैव महानसः निश्चित साध्याभाववान् विप
क्षः यथा तत्रैव हृदः सव्यभिचार विरुद्ध सत्प्र
तिपक्षासिद्ध बाधिताः पंच हेत्वाभासः सव्यभि
चारोनैकांतिकः सत्रिविधः साधारणासाधार
णानुपसंहारि भेदात् तत्र साध्याभाववद्वृत्तिः
साधारणोनैकांतिकः यथा पर्वतोग्निमान् प्रमे
यत्वादिति प्रमेयत्वस्य वह्न्यभाववति हृदेपि वर्तमा

१३५

118

नत्वात् सर्वसपक्षविपक्षव्यावृत्तो ऽसाधारणः य
था शब्दो नित्यः शब्दत्वादिति शब्दत्वं सर्वेभ्यो
नित्येभ्यो ऽनित्येभ्यो व्यावृत्तं शब्दमात्रवृत्ति अन्वय
व्यतिरेकदृष्टांतरहितो ऽनुपसंहारी यथा सर्वम
नित्यं प्रमेयत्वात् इति सर्वस्यापि पक्षत्वाद् दृष्टांतो
नास्ति साध्याभावव्याप्तो हेतुर्विरुद्धः यथा शब्दो
नित्यः कृतकत्वादिति कृतकत्वं हि नित्यत्वाभावे
नानित्यत्वेन व्याप्तं साध्याभावसाधकं हेत्वंतरं य
स्य स सत्प्रतिपक्षः यथा शब्दो नित्यः श्रावणत्वा
त् शब्दत्ववत् शब्दो ऽनित्यः कार्यत्वात् घटवदिति
असिद्धस्त्रिविधः आश्रयासिद्धः स्वरूपासिद्धो
व्याप्यत्वासिद्धश्चेति आश्रयासिद्धो यथा गगनार

रविंदं सुरभ्यरविंदत्वात्सरोजारविंदवदिति अत्र गगना
नारविंदमाश्रयः स च नास्त्येव स्वरूपासिद्धो यथा
शब्दो गुणश्चाक्षुत्वादिति अत्र चाक्षुषत्वं शब्दे नास्ति
शब्दस्य श्रावणत्वात् सोपाधिको व्याप्यत्वासिद्धः
साध्यव्यापकत्वे सति साधनाव्यापकत्वमुपाधिः सा
ध्यसमानाधिकरणात्यंताभावाप्रतियोगित्वं साध्य
व्यापकत्वं साधनवन्निष्ठात्यंताभावप्रतियोगित्वं
साधनाव्यापकत्वं पर्वतो धूमवान् वह्निमत्वादित्यत्रा
र्द्रेंधनसंयोग उपाधिः यत्र धूमस्तत्रार्द्रेंधनसंयोग इति
साध्यव्यापकत्वं यत्र वह्निः तत्रार्द्रेंधनसंयोगो नास्ति अ
योगोलके आर्द्रेंधनाभावात् एवं च साध्यव्यापकत्वे स
ति साधनाव्यापकत्वादार्द्रेंधनसंयोग उपाधिः सोपाधि
कत्वाद्वह्निमत्वं व्याप्यत्वासिद्धं यस्य साध्याभावः प्रमा
णांतरेण निश्चितः स बाधितः यथा वह्निर्हिमद्रव्यत्वादिति अ
नु

१३५

119

त्रानुष्णत्वं साध्यं तदभावः उष्णत्वं स्पर्शनप्रत्यक्षेण गृह्यत इति
बाधितत्वं व्याख्यातमनुमानं उपमितिकरणमुपमानं संज्ञा
संज्ञिसंबंधज्ञानमुपमितिः तत्करणं सादृश्यज्ञानं तथा हि
कश्चिद् गवयशब्दार्थमजानन् कुतश्चिदारण्यकपुरुषाद् गोस
दृशो गवय इति श्रुत्वा वनं गतो वाक्यार्थं स्मरन् गोसदृशं पिंड
पश्यति तदनंतरमयं गवयपदस्ते गवयशब्दवाच्योयमित्युपमि
तिरुत्पद्यते आप्तवाक्यं शब्दः आप्तस्तु यथार्थवक्ता वाक्यं पदस
मूहः यथा गामानयेति शक्तं पदं अस्मात्पदादयम
र्थो बोद्धव्य इतीश्वरसंकेतः शक्तिः आकांक्षा योग्यता स
न्निधिश्च वाक्यार्थज्ञाने हेतुः पदस्य पदांतरव्यतिरेकप्रयुक्ता
न्वयाननुभावकत्वमाकांक्षा अर्थाबाधो योग्यता पदानामवि
लंबेनोच्चारणं सन्निधिः आकांक्षादिरहितं वाक्यमप्रमाणं य
था गौरश्वः पुरुषो हस्तीति न प्रमाणं आकांक्षाविरहात् अग्निना
सिंचेदिति न प्रमाणं योग्यताविरहात् प्रहरे प्रहरे सहोच्चारि
तानि गामानयेत्यादिपदानि न प्रमाणं सान्निध्याभावात् वा

क्यं द्विविधं वैदिकं लौकिकं च वैदिकमीश्वरोक्तत्वात्सर्वमेव प्रमा
णं लौकिकं चाप्तोक्तं प्रमाणमन्यदप्रमाणं वाक्यार्थज्ञानं परा
र्थज्ञानं कारणं तत्करणं शब्दः यथार्थानुभवो निरूपितः अ
यथार्थानुभवस्त्रिविधः संशयविपर्ययतर्कभेदात् एकस्मि
न्धर्मिणि विरुद्धनानाधर्मवैशिष्ट्यावगाहि ज्ञानं संशयः यथा स्था
णुर्वा पुरुषो वेति मिथ्याज्ञानं विपर्ययः यथा शुक्ताविदं रजत
मिति व्याप्यारोपेण व्यापकारोपस्तर्कः यथा यदि वह्निर्न स्यात्त
र्हि धूमोऽपि न स्यादिति स्मृतिरपि यथार्था अयथार्था च प्रमाजन्या य
थार्था अप्रमाजन्या अयथार्था सर्वेषामनुकूलवेदनीयं सुखं प्र
तिकूलवेदनीयं दुःखं इच्छा कामः क्रोधो द्वेषः कृतिः प्रयत्नः वि
हितकर्मजन्यो धर्मः निषिद्धकर्मजन्यस्त्वधर्मः बुद्ध्यादयोऽष्टा
वात्ममात्रविशेषगुणाः बुद्धीच्छाप्रयत्नाः नित्या अनित्याश्च
नित्या ईश्वरस्य अनित्या जीवस्य संस्कारस्त्रिविधः वेगो भाव
ना स्थितिस्थापकश्चेति वेगः पृथिव्यादिचतुष्टयमनोवृत्तिः
अनुभवजन्या स्मृतिहेतुर्भावना आत्ममात्रवृत्तिः अन्यथाकृत

स्य पुनस्तद्वस्थापकस्थितिस्थापकः कटादिपृथ्वीवृत्तिः॥ चल
नात्मकं कर्म ऊर्ध्वदेशसंयोगहेतुरुत्क्षेपणं अधोदेशसंयोगहे
तुरपक्षेपणं शरीरसंनिकृष्टसंयोगहेतुराकुंचनं विप्रकृष्टसं
योगहेतुः प्रसारणं अन्यत्सर्वं गमनं पृथ्व्यादिचतुष्टयमनोमा
त्रवृत्तिः कर्म नित्यमेकमनेकानुगतं सामान्यं परमपरं च द्रव्य
गुणकर्मवृत्ति परं सत्ता अपरं द्रव्यत्वादि नित्यद्रव्यवृत्तयो व्यावर्त्त
का विशेषः नित्यसंबंधः समवायः अयुतसिद्धवृत्तिः ययोर्मध्ये
एकमपराश्रितमेवावतिष्ठते तावयुतसिद्धाविति यथावयवा
वयविनौ गुणगुणिनौ क्रियाक्रियावन्तौ जातिव्यक्ती विशेषनि
नं त्यद्रव्ये चेति अनादिः सांतः प्रागभावः उत्पत्तेः पूर्वं कार्यस्य सादिर
नंतः प्रध्वंसः उत्पत्त्यनंतरं कार्यस्य त्रैकालिकसंसर्गावच्छिन्नप्रतियो
गिताकोऽत्यंताभावः यथा भूतले घटो नास्तीति तादात्म्यसंबंधावच्छि
न्नप्रतियोगिकोऽन्योन्याभावः यथा घटः पटो न भवतीति सर्वेषाम
पि पदार्थानां यथायथमुक्तेष्वंतर्भावात्सप्तैव पदार्थाः इति सिद्धं का
णादन्यायमतयोर्बालव्युत्पत्तिसिद्धये अन्नंभट्टेन विदुषा रचितस्त
र्कसंग्रहः इति तर्कसंग्रहः समाप्तः श्रीशिवाय नमः श्रीरामचंद्राय नमः

ॐ स्तोष्ये भक्त्या विष्णुमनादिं जगदादिं यस्मि
न्नेतत्संसृतिचक्रं भ्रमतीत्थं यस्मिन्दृष्टे नश्यति इसप्रकार
तत्संसृतिचक्रं तं संसारध्वांतविनाशं हरिमी क्याकर्त्ताकि संक्षिप्तकर
डे १ यस्यैकांशादित्थमशेषं जगदेतत्प्रादु वालानारि रूपकर
र्भूतं येन पिनद्धं पुनरित्थं येन व्याप्तं येन वि
बुद्धं सुखदुःखैः तं २ सर्वज्ञो यो यश्चहि सर्वः
सकलो यो यश्चानंदोनंतगुणो यो गुणधा
मा यश्चाव्यक्तो व्यस्तसमस्तः सदसद्यस्तं
डे यस्मादन्यन्नास्त्यपि नैवं परमार्थं दृश्यादन्यो

= व्यवहारसिद्धपदार्थ
जिससे नहीं भि
न्न

त्वद्विषयं ज्ञानमयत्वात् सोऽतः ज्ञानज्ञेयत्वेही
नाऽपि सदृशाज्ञ स्तं ४ आचार्य्यभ्यो लब्धा सुस्
स्माचुतत्वा वैराग्येणाभ्यासबलाद्धैव
हृदीक्षा भक्तौ एकाग्न्य ध्यानपरायां विदुरी
त्वं तं ५ प्राणानायम्योऽस्मि तिरश्चैतं हृद्देरुधा
नान्यत्समत्वात्तस्तुन रत्रैव रवेलापा द्वारोस्वि
तेभ्योर्हरश्चीरस्मीति विदुर्यं तं ६ येब्रह्मारव्यं
देवमनन्तं परं पूर्णं हृत्स्थं भक्तैर्लभ्यमजं
सूक्ष्ममनन्तं ध्यात्वात्म स्थं ब्रह्मस्वरूपं विदु

रूपं तं ७ मात्रातीतं स्वात्मरूपैकाग्रात्मरूपबोधं।
ज्ञेयातीतं ज्ञानमयं हृद्युपलभ्यं भावग्राह्यं।
नंदमनन्यं चरूपं तुर्यं तं ८ यदच्छेद्यं वस्तुसतत्व
रविषयारवं नतत्रद्वैतं त्रिरूपे स्थिचालरहं च॥ध्या
यं त्वेवं यं सनकाद्यास्तु न योज्यं तं ९ यद्बोधे यं तत्र
रहं नेत्तिरूपेहाय स्वात्मज्योतिर्ज्ञानमयानंदरूप
९. वाप्य तस्मिन्नस्मीत्यात्मरूपेरोयं रवैदुरीयं तं
१० रहिताचारहिताद्रूपमशेषं सर्वविकल्पं मत्वारह्णि
ह्रमादर्शि मात्रं गगनाभं त्यक्त्वा देहं यं प्रविशं

१२८

122

न्यचुतमक्तास्तंसं ११ सर्वत्रास्ते सर्वशरीरी न च
सर्वः सर्वं वेत्ति वेद्यं नेह यं वेत्ति सर्वः सर्वज्ञं तर्या
मित्ति येत्यं यमनन्यास्तं १२ सर्वं दृष्ट्वा स्वात्मनेवु
क्ताजगदेतं दृष्ट्वात्मानं चैवमजं सर्वजनेषु स
र्वात्मैकोस्मीति रविं दुर्यं जिनहत्स्थं तं १३ सर्व
त्रैकः पश्यति जिघ्रति भुंक्ते स्पृशति श्रोता बु
ध्यति चेत्ताहुरिमं यं साक्षी चास्ते कर्तृषु पश्यति
ति चान्ये तं १४ पश्यन्शृण्वन्नत्र विजानन्रज
घ्रन्भुंजन्देहस्मेमं जीवन्तं येत्यं इत्यात्मानं यं रविंदु

स्वात्मप्रबोध

रीशं रविबयन्तं नं १४ जाग्रद्द्रष्टा स्थूलपदार्थान
थमायां दृष्टा स्वप्नेप्यर्थे सुषुप्तौ सुखघनेड्यं इत्या
त्मानं वीक्ष्य मुदास्ते चतुरीयं नं १६ पञ्चवक्त्रो
यहृदय एको गुणभेदान्नानाकारान्स्फाटिकव
ज्जातिर्विचित्रः स्पष्टः स्पष्टप्रायमजः कर्मफ
लैर्यस्तं १७ ब्रह्मा विष्णुरुद्रो नाग्नौ रविचंद्र॥
स्त्वेंद्रो वायुर्यज्ञ इत्यपि परिकल्प्या एकं संतं यं
बहुधा कल्पयंति भेदान्तं १८ सत्यं ज्ञानं सुखमनंतं
व्यतिरिक्तं त्वांतं गूहं स्वं निष्कलमानेर मननं इ

१३५
123

स्याहशोयंवक्तासौभाग्येजंतं १९ कोशानेता
न्यंचरस्याहीनः स्नेहाय अस्मास्मीतिस्वात्मरन्तिरने
ष्वित्याइष्ठिस्थः शिवार्हिश्रोवेदभगुयंयजुरंते
तं २० येनाखेशोयस्यचक्षुशक्त्यायाद्धीनः हेग
शोयंकारियताजंतुषुकर्तुः कर्तामोक्तात्मात्र
हिरश्चित्स्वपथाधिरूढः तं २१ सष्टासर्वस्वात्मत
येवेस्यमत्तर्क्यं व्याख्यार्थंतिकत्सम्येदंस एम
षं सत्यत्वचाभूतपरमात्मासर्व एकस्तं २२
वेदांतप्राध्यात्मकशास्त्रेषुपुराणेः शास्त्रे

श्रात्वेः सातत्वतत्त्रैपत्र यमीत्रां २ ष्टाप्यांतपेश्च
तस्सिबुध्धारवेरवित्सुर्यंत्तं २२ स्वश्राममस्त्तिध्यान
समाधैयतिमानै स्तानुत्राकोरे वद्धैवाप्तुय
ईत्रा: उवित्तियोजेन्मत्रुत्तेपत्रारपेरवेनातैस्तं २
पे यस्यातकंस्वात्मरवेभूत्तेः परमार्थं सर्वरव
रल्वेत्यत्र तिरुक्तं प्रुत्तेवाङ्गिः तेजारेत्वाहरष्टि लेसत्रजते जन्मारद्वैत सद्देत्रा२ नैं
तरंगाभमरमेत्रं तं रपदृष्टुगीतास्वहरतत्वे
रवेरधिनाजे भक्त्याग्व्यालिभ्यस्हदेस्थांहृस्त्रीमा
विउर्यंतं २६
त्रं ध्यात्वातरसोत्रसमहरमेत्यत्र
तेरद्विधिपूर्ण २ =श्रहंश्रस्मि १

१४०

124

हे त्रसत्वं प्राप्य विभुः पंचमुखैर्वर्णभुंकेजस्संभो
गपपराधान्प्रकारतेस्य: हे त्रै हैं त्रैर्पक्वंहुवदेको
बहुधास्तेतं २७ युक्तालोहन व्यासवचोस्य
त्रेहेलम्य: हे त्र हे त्र मातरवडि पुरुषाख्य:
योहं सो सो सो स्यहमेव स्तोर्वेदुयंति २८ एकी
कत्यानेकशरीरस्यरमेमंत्रं परंवेत्तायेहैव
सएवाप्नुभवंति यस्मिंलीनानेह पुनर्जन्म
लभंते तं २९ द्वे द्वैकत्वंयच्चमधुमालतावाक्यैः
कत्वानारांकोपासनमासाद्यवेभूत्वा योसो

सोहं सोस्म्यहमेवेत्तिरविदुर्यतं ३० योयंदेहे चेष्टयेता
तः करणास्थः सूर्यं चासौताप्यरयेत्तासोस्म्यहमेव॥
इत्यात्मैक्योपासनयायं विदुरीश्वरं तं ३१ विज्ञानांश्रो
घस्यसत्तः श्राकाशधिरूहो बुद्धिर्बुध्यत्यत्र वरहे बोध्यप
दार्थान् नैवांतस्थं बुध्यत्ति यंबोधरयेतारंतं ३२ कोयं
देहे देव इत्यास्यं सुरवेचार्यमोता प्रोतानंद यताच्चेष
रहेदेव इत्यालोच्यज्ञाना इहास्मीरत्तिरविदुर्यं तं ३३ को
ह्येवान्याशात्मरनेन स्यादयमेव ह्येनानंदः प्राणरिति
चापानेत्तिचेरते इत्यस्तित्वं वस्तुपपत्याश्रुत्तिरवा तं
३४ प्राणो वाहं वाकू प्रवता हीरनेमनोवा बुद्धिर्वाहं
व्यस्तउता होथापि समस्तः इत्यालोच्यज्ञ रवे इहास्मी

स्तेरवेदुर्यंतं २५ नाहंप्राणोनैवशरीरंनमनोहं बुद्धि
र्नाहंनाहमहंकारधियौच योत्रज्ञांशः सोस्म्यहमेवे
स्तेरवेदुर्यंतं २६ सत्तामात्रंकेवलविज्ञानमजंसत्सू
क्ष्मं नेत्यं तत्त्वमसीत्यात्मसुताय साम्नामंतेप्राहपि
तायंरवेभूमा यंतं २७ मूर्तामूर्तेपूर्वमपोहायसमा
धौ दृश्यंसर्वंनेतिचनेतीतिविहाय चैतन्यांशोस्वा
त्मनिसंतंचरवेदुर्यंतं २८ ओतंप्रोतंयत्रचसर्वंग
गनांतं योस्थूलानण्वादिषुसिद्धोहरसंज्ञःसो
तात्तोन्योनेत्युपलभ्योनचवेद्यस्तं २९ यावत्सर्वं
सत्यमिवाभातीयदेतत् यावत्सोस्मीत्यात्मनियो
ज्ञोनहिदृष्टः दृष्टेतस्मिन्सर्वमसत्यंभवतीदंतं

५०॥ रागाद्युक्तं त्वेहयुक्तं हे मयवशानो येनाष्टांगैकज्वाले
त ज्ञानमयाग्नौ दग्ध्वात्मानं यं परिशिष्टं च विदुर्यं
तं ५१ यं विज्ञानजोतिषमाद्यं सुखिमांतं हृच्चक्रेंदु ८
न्याकसमीडन्तं तदुद्दामं भक्त्याराध्यो हे वरचेत्रात्मा
त्मरतेसंतं तं ५२ पायाज्ञ कं स्वात्मरतेसंतपुरुषं यो
भक्त्या स्तौतीत्यां गिरं सविधुररेमं मां इत्यात्मानं
स्वात्मरतेसेहत्य सदैकस्तं ५३ इत्यं स्तोत्रं भक्त
जनेडंतं भवतीति ध्यांताक्कमिं भगवत्पादीयरमेदं
यः स्वैक्यो लोकिं पठरते प्रतोत्ति अजरते सो ज्ञानं
ज्ञेयं चाप्नोति मनुष्यः ५५ इति श्रीमत्परमहंस
परिव्राजकाचार्यश्रीमच्छंकराचार्यविरचिता हरि
स्तुतिः समाप्तः ॐ
१८८१ मंगसिर १९

श्रीरामायनमः श्रीवसिष्ठ उवाच ब्रह्मन्ब्रह्मतत्परेनै
वेद हृदये निगुल्लिंगुणाद्वयः कथं चरंति प्रभुत्वयः साहात्से
दृसत्तः पर १ टी० पूर्वाध्यायांते एवं स्वभक्तयोराज
नूभगवान्भक्तभक्तिमान् उत्थित्वा दिव्यसंमार्गं वेदर्थ
पुनर्धारबलीममार्द्दित्वात्रसन्मार्गंसिंतोस्वतःप्रमा वेद
ताभूतानामप्रमात्यकारणारहितानांवेदानां
मार्गेच्छिन्नपरत्वमुपदिशन्नपभगवान्मार्दित्युक्तं
तत्रवेदानांब्रह्मपरत्वमुघटमानंमन्वानःपदी
रत्तौ॥ तत्रतावन्मुख्यालंहरणागुणमेदेनत्रिविधाश्र
रुप्रवर्त्तिः तत्रमुख्यापिरूढि योगभेदेनद्विधा
रूढिश्च स्वरूपेणजात्यागुणेनवानिर्दिशन्नाह

त्रिस

वस्तुनि संज्ञासंज्ञिसंकेतेन प्रवर्त्तते यथा डित्थः गौरित्युक्त
इति रूढिः लक्षणा च तेनैव संकेतेनाभिहितार्थसंबंधे
ति यथा गंगायां घोष इति गौणी चाभिहितार्थलक्षित
गुणायुक्ते तत्सदृशे यथा सिंहो देवदत्त इति यथा॥ अ
भिधेयाविनाभूत प्रवृत्तिर्लक्षणोच्यते लक्ष्यमाणगुणै
र्योगाद्वृत्तेरिष्टा तु गौणतेति १ योगवृत्तिस्तु एतत्त्रिवि
दूय धवृत्तिप्रतियारहितपदार्थयोः प्रकृतिप्रत्ययार्थयोर्यो र्वा
गेन यथा पंकजं अपगावः पाचक इत्यादि तत्र तावद्
स्यारतीरूढिवृत्तिर्न संभवतीत्याह साक्षात्कथंचन इं
त्वि इति न च हेतुः अग्नेरिन्द्ररूप इति अग्नेरिन्द्ररूपस्यापि हेतु
वदन्नुगुणावृत्तिं निराकरोति स्नेगुणो गुणावृत्तय इति
गुणो वृत्तिमिनाभ्रत्ये स्नेगुणो कथंचन इतीत्यर्थः स्नेगुणत्वे
रिपि हेतुं वदन्न लक्षणां योगं च निराकरोति सस्सतः परद

१४३

127

त्ते कार्यकारणाभ्यां परस्मिन्नसंयोकेन स्वैरसंबं
धाभावात् नलक्षणायोगावृत्ती संभवतः एवं परार्थ
त्वायोगात्परार्थस्यवाक्यार्थत्वायोगान्न प्रवृत्तिगो
चरत्वं लक्षणाइत्यभिप्रायः १ उत्तरमाह प्रीप्सुक उवा
च बुद्धीन्द्रियमनःप्राणान् जनानामसृजत्प्रभुः मा
त्रार्थं च भवार्थं च आत्मनेकल्पनाय च २ टी० बुद्धा
दीनुपाधीन् जनानामनुशयिनां जीवनां मात्रार्थं प्र
भुरीश्वरोऽसृजत् मीयंत इति मात्रा विषयाः तदर्थं
भवार्थं जन्म लक्षणां कर्मतत्प्रभवेति कर्मकरणार्थमित्य
र्थः आत्मने लोकांतरगामिने आत्मनस्तत्र लोकभोगा
येत्यर्थः कल्पनाय कल्पनानि वृत्तये मुक्तय इत्यर्थः
अर्थधर्मकाममोक्षार्थमिति क्रमेणापदचतुष्टयस्यार्थः

र्थे जन्मनैव जन्म जीवानामुच्यते न खलो घटनादित्याह
श्लो० न घटत उभयः प्रकृतिपुरुषयोरजयोरुभयपु
जाभवेत्प्रसुमतो जलबुद्बुदवत् ॥ त्वायेत इमे ततो थे
रवेधा नामनुतौः परमेश्वरेत इत्यातिमधुलेलेलु
रन्योषरसाः १८ नेश्वरकें प्रकृतेजीवरूपतोऽभवः स्या
त्पुरुषस्यवा उभयोर्वा आद्ये जीवानां जडत्वापत्तेः द्वि
तीये पुरुषस्याद्येकारित्वप्रसंगः अत एव नततीयइ
त्यावृत्येनोक्तं प्रकृतिपुरुषयोरुभवो न घटत इति
अनुत्पाजत्वप्रसंगे पादनादपीत्याह अज योरिति त
था च श्रुतिः अजामेकां लोहितशुक्लकृष्णां बह्वीः
प्रजाजनयंतीं स्वरूपाः अजो ह्येकोजुषमाणोऽनु
शेते जहात्येनां भुक्तभोगा ॥ मजोन्य इति उभयथजा

रत्ते कार्यकारणाभ्यां परस्मिन्नसंगो केनचिदस्य संबं
धाभावात् न लक्षणया वृत्तीसंभवतः एवं परार्थ
त्वायोगात् परार्थस्य वाक्यार्थत्वायोगान्न प्रवृत्तिगो
चरत्वं ब्रह्मण इत्यभिप्रायः १ उत्तरमाह श्रीशुक उवा
च बुद्धीन्द्रियमनःप्राणान् जनानामसृजत्प्रभुः मा
त्रार्थं च भवार्थं च आत्मनेऽकल्पनाय च २ टी० बुध्या
दीनुपाधीन् जनानामनुशयिनां जीवनां मात्राद्यर्थं प्र
भुरीश्वरोऽसृजत् मीयंत इति मात्रा विषयाः तदर्थं
भवं जन्मलक्षणं कर्म तदर्थमिति कर्मकरणार्थमित्य
र्थः आत्मने लोकांतरगामिने आत्मनस्तत्तल्लोकभोगा
येत्यर्थः अकल्पनाय कल्पनानिवृत्तये मुक्तय इत्यर्थः
अर्थधर्मकाममोक्षार्थमिति क्रमेण पदचतुष्टयस्यार्थः

जनानारभिरतिवस्न जीवार्थमीश्वरस्य सृष्ट्यादिषु प्रव
र्त्तेरित्ति दर्शयति प्रभुरीश्वरस्य उपाधिवश्यताभावे
न नित्यमुक्ततां दर्शयति अयमर्थे प्रायः सुगुणमे
वागुरोरनर्भे भूतं सर्वज्ञं सर्वशक्तिं सर्वेश्वरं सर्व
स्य नियंतारं सर्वोपास्यं सर्वकर्मफलप्रदातारं स
मस्तकल्याणगुणनिलयं सच्चिदानंदं भगवंतं श्रु
तयः प्रतिपादयंति यः सर्वज्ञः सर्ववित् यस्य ज्ञान स
मयं तपः सर्वस्य वशी सर्वस्येशानः यः पृथिव्यां
तिष्ठन् पृथिव्यांतरः सोऽकामयत बहुस्यां सरोहत
तत्तेजोऽसृजत सत्यं ज्ञानमनंतं ब्रह्म इत्याद्याः तथा
भूतेश्वरत्तानां वत्संसारिणो जीवस्य तत्त्वेन तत्प
ते तत्त्वमसीत्यादि वाक्यानि बोधयंति तत्र च तत्त्वं पद

१५४

128

योः सामानाधिकरण्यं प्रतीयते नच प्रकारांतरेणा
घटमानं वस्तु पर्यवसानं गमयति तथाहि नताव
द्वेष्यद्व्यामिश्रितिवदुभयोरेकार्थाभिधानेन सामा
नाधिकरण्यं यथोक्तं आरमिक्षां देवतायुक्तां वस्त्ये
वैषत्तहित आरमिक्षापदसांनिध्यात्तस्यैव विशेषया
र्यता मिति कुतः भिन्नार्थत्वात् नचजहत्स्वार्थयो
र्जहल्लक्षणयार्विशेषणविशेष्यभावेन नील
मुत्पलमितिवत् यथोक्तं स्वबुद्ध्यारज्यते येन वि
शेष्यं तद्विशेषणमित्यादि कुतः एकार्थत्वेन त
दयोगात् नचजहत्स्वार्थत्वेन संबंधलक्षणया कुंभे ए३
तडुमागारितिवत् कुतः एकार्थस्यैवविवक्षितत्वात्
अतो जहदजहत्स्वार्थलक्षणया सोयं देवदत्त इति

र्घेजन्मनैवजन्मजीवानामुच्यते नस्वतोघटनादित्याह
श्लो० नघटतउद्भवः प्रकृतेपुरुषयोरजयोरुभयपयु
जाभवेत्पसुमतोजलबुद्बुदवत्‌॥त्वयेत इमेततोघे
र्विधनामगुतौः परमेश्वरेत इत्यादिमधुरन्नेलेलु
रन्योपदशाः १८ नयकेप्रकृतेर्जीवरूपेणोद्भवः स्या
त्पुरुषस्यवाउभयोर्वाआद्येजीवनोलडुत्वापत्तेः द्वि
तीयेपुरुषस्याद्येकालित्वप्रसंगः अतएवनतृतीयइ
त्याशयेनोक्तं प्रकृतेपुरुषयोरुद्भवोनघटतइत्ते
वमुक्त्वाजेत्वप्रत्येपाद्नादयीत्याह अजयोरिने त
थाचश्रुतिः अजामेकांलोहितशुक्लकृष्णांबह्वीः
प्रजाजनयंतीस्वरूपाः अजोह्येकोजुषमाणोऽनु
शेतेजहात्येनांभुक्तभोगा॥मजोन्यइति उभययुजा

129

तुभवंतितउभयंचतत युज्यतइतियुक्तसंबंधपरस्परा
ध्यस्तमितियावत् तेनक्रमुभतः प्राणाद्युपाधयो
जीवाजायंतेऽस्यार्थः जलबुद्बुदवदिति यथाकेवले
नासलिलेन वासलिलेनवाजलबुद्बुदानभवंति किं
तु मिलिताभ्यांतद्वत् तत्रच यथानैलोनैमित्तंजल
मुपादानं एवमत्रापिप्रकृतिर्निमित्तं पुरुषउपा
दानं तस्माद्वाएतस्मादात्मनआकाशः संभूतः
सोकामयतबहुस्यांप्रजायेयेति यथाग्नेः क्षुद्रा
विस्फुलिंगाः व्युच्चरंत्येवमेवास्मादात्मनः सर्वे
प्राणाः सर्वेलोकाः सर्वेदेवाः सर्वाणिभूतानि
सर्वएतआत्मनोव्युच्चरंतीत्यादिषुप्रकृतिषुचेतना
चेतनप्रपंचस्यपरमात्मोपादानत्वप्रवणात्

न चाविकारित्वं परिणामानंगीकारात्केचित्पुनः परिणा
ममंगीकृत्यात्मनो विकारमेवार्थेपरीतं निर्णीतोपाधि
न भावमिच्छन्ति सर्वथातावत्प्रकृतिपुरुषैक्याद्वर्तीरते
सिद्धं तस्यैकमेवाद्वितीयं ब्रह्म आत्मामेकोऽस्येनाजीवात्म
रूपमात्मेत्यादिश्रुतिबलात् उत्पत्तिप्रवणाच्च जीवात्मा
मोपाधिकमेव जन्म न वस्तुत इत्युक्तं उपाधिलयेन पर
मात्मनि पुनर्लयप्रवणात् रूपेन वास्तवं जन्मेत्याह त्व
यीति त्वयि विकारात्मनेति इमे जीवास्तत इति यतो न
वास्तवं जन्म तस्माद्विविधनामनतोऽनेकप्रकारका
योपाधिरभेः सौम्य सुषुप्तौ लीना बभूवुः ततः सुषुप्ते प्रल
ययोर्मधुन्यन्नौषधरसा इव लीयन्ते यथा मधुनि सक
लकुसुमरसा विवेकमेव नोपलभ्यमाना अस्यैव सामा
न्येनोपलभ्यन्ते एवं स्वोपाधौ विलीनमात्रलयात्कार

१५९ -130

तास्वरवेद्यमानत्वात्सामान्यतोवर्त्तते मुक्तोनुकारँस्या
द्पेलयात् त्वयिपरमेनिरूपाधौसर्वंतद्वासनाविलीयं
तदस्तीत्विवेकः तथाचश्रुतयः यथासौम्यमधुमधुक
तोनिस्तिष्ठंतिनानात्ययानांवृक्षाणांरसान्समवहार
मेकतांगमयंतितेयथातत्रविवेकंनलभंते अमुष्या
हंवृक्षस्यरसोस्म्यमुष्याहंवृक्षस्यरसोस्मीत्येवमे
वखलुसौम्येमाःसर्वाःप्रजाःसतिसंपद्यनविदुःसति
संपद्यामहइति यथानद्यःस्यंदमानाःसमुद्रेस्तंगछं
तिनामरूपेविहायतथाविद्वान्नामरूपाद्विमुक्तःप
रात्परंपुरुषमुपैतिदिव्यमित्याद्याः१८ यस्मिन्बुध
स्थितेयमस्थयज्ञातिर्विष्वंतयाद्वैजीवोपेतंगुरुकरु
णायाकेवलात्मावबोधे अत्यंतांतंव्रजतिसहसासि
धुवत्सिंधुमध्येमधोश्चिह्नंतस्मैभवनगुरवेभावयेतंनसिंहं
२

अन्यप्रकारेण

भवेत्सम्यगनुजानतां परमतं मतं तु यस्तथा १७ वस्तुनस्त्वानं
ता धुवास्ते नैव रूपेणाख्येयाः सर्वगता अनुभूतो जीवाय
रेस्युस्तर्हि निषांसमत्वात् ज्ञानस्यतानघटत इत्याशंक्याह धुव
त्वे यन्मोक्षे यमनेत्वयानस्यात् इतरथा तु घटेत इति कथंय
मयं उपाधितो यदहंकारप्रायं यजीवाख्यं अज्ञाने जातं तत्र
स्य स्वाविकारस्याने यंत्र नियामकं भवेत् अविद्या व्याकार
णत या अपरित्याज्य एकं तत्सम्यगनुस्यूतं ननु एकं यत्
द्वैधीयते चेत्तदुच्यतामित्यत आह अनुजान
तां यत्परमतमसीत्ति जानीमहे इत्येवं तां परमतमविज्ञातप्राय
अविषयत्वात् तथा च श्रुतिः यस्यामतं तस्य मतं मतं य
स्य न वेद सः अविज्ञातं विजानतां विज्ञातमविजानतां अव
चनेनैव प्रोवाच सहतूष्णीं बभूवेत्यादि एकं च मतस्य

१८७

श्रीः ज्ञातस्य दुःखत्वाद्दोषप्रचलनात् तथा च श्रुतिः पारे मन्य

से सुखेद्रते इहरमेवार्थे नूनं त्वं वेत्थ ब्रह्मलोकरूपं यद्दस्य त्वं

131 देवेषु वेद इत्यादि तस्माद्यत्राद्यष्टु विघोत्यमतत्थंगिरुके

मर्त्ये सर्वाणि स्यूतत्वेन समर्पणेयंतम्भवेदित्यर्थः ९७ अ

तर्यतः सर्वलोकस्य गतिः प्रवृत्यायुत्त्या चैवमेवावसे

यः यः सर्वज्ञः सर्वशक्तिर्नृसिंहः श्रीमत्तं तं चेतसैवा

वलंबे ॥१॥ ननु च यदि परमात्मनो जीवा जायेतेइ

त्तिनियंतृत्वे यन्यभाव उच्यते तथा सति जीवानामने

त्यत्वप्रसंगो न प्रतेरेनं कृतनाशाकृताभ्यागमप्रसं

गः स्यात् १ किं च तदा मोक्षो नाम जीवस्य स्वरूपहानि

रेव स्यात् न चैतद्युक्तं स्वप्रकाशज्ञानेदात्मनोऽर्थेघाकृता

नर्थनिवृत्तेर्मात्रस्य मोक्षत्वाभ्युपगमादित्याशंक्योपा